वैयाकरणसिद्धान्तकौमुदी

१७-द्वन्द्वसमासप्रकरणम् -२

२७.०४.२०१४

पुनरावर्तनम्

- द्वन्द्वसमासः
  - चार्थे द्वन्द्वः (२.२.२९)
  - समुच्चय-अन्वाचय-इतरेतरयोग-समाहाराः चार्थाः ।
- द्वन्द्वे पूर्वनिपातनियमाः
  - द्वन्द्वे घि (२.२.३२)
  - अजाद्यदन्तम् (२.२.३३)
  - अल्पाच्तरम् (२.२.३४)
  - राजदन्तादिषु परम् (२.२.३१)

पुनरावर्तनम्

- समाहारद्वन्द्वः
  - द्वन्द्वश्च प्राणितूर्यसेनाङ्गानाम् (२.४.२)
  - अनुवादे चरणानाम् (२.४.३)
  - अध्वर्युक्रतुरनपुंसकम् (२.४.४)
  - अध्ययनतोऽविप्रकृष्टाख्यानाम् (२.४.५)
  - जातिरप्राणिनाम् (२.४.६)
  - विशिष्टलिङ्गो नदीदेशोऽग्रामाः (२.४.७)
  - क्षुद्रजन्तवः (२.४.८)
  - येषां च विरोधः शाश्वतिकः (२.४.९)

पुनरावर्तनम्

- शूद्राणामनिरवसितानाम् (२.४.१०)
- गवाश्वप्रभृतीनि च (२.४.११)
- विभाषा वृक्षमृगतृणधान्यव्यञ्जनपशुशकुन्यश्व-वडवपूर्वापराधरोत्तराणाम् (२.४.१२)

विप्रतिषिद्धं चानधिकरणवाचि (२.४.१३)

- पदत्रयम् । विप्रतिषिद्धम्, च, अनधिकरणवाचि ।
- 'द्विगुरेकवचनम्' ((२.४.१) इत्यतः 'एकवचनम्' इति, 'द्वन्द्वश्च प्राणितूर्यसेनाङ्गानाम्; (२.४.२) इत्यतः 'द्वन्द्वः' इति च अनुवर्तते ।
- विरुद्धार्थानाम् अद्रव्यवाचिनां द्वन्द्वः एकवद्वा स्यात् ।
- शीतोष्णम्/ शीतोष्णे ।
- वैकल्पिकः समाहारद्वन्द्वः 'चार्थे' इति सूत्रेण प्राप्तः, स विरुद्धार्थानां यदि भवति तर्हि अद्रव्यवाचिनामेवेति नियमार्थमिदम् ।
- तेन द्रव्यवाचिनाम् इतरेतरयोग एव ।
- शीतोष्णे उदके स्तः ।

- विप्रतिषिद्धं किम्?
- नन्दकपाञ्चजन्यौ ।
- इह पाक्षिकः समाहारद्वन्द्वो भवत्येव ।

न दधिपयआदीनि (२.४.१४)

- पदद्वयम् ।
- 'द्विगुरेकवचनम्' ((२.४.१) इत्यतः 'एकवचनम्' इति, 'द्वन्द्वश्च प्राणितूर्यसेनाङ्गानाम्; (२.४.२) इत्यतः 'द्वन्द्वः' इति च अनुवर्तते ।
- एतानि नैकवत्स्युः ।
- दधिपयसी ।
- दधि च पयश्च ।
- 'विभाषा वृक्षमृग...' इति प्राप्तः विकल्पः बाध्यते ।

- इध्माबर्हिषी ।
- इध्मं च बर्हिश्च ।
- निपातनाद् दीर्घः ।

- ऋक्सामे ।
- ऋक् च साम च ।

- वाङ्मनसे ।
- वाक् च मनः च ।

अधिकरणैतावत्त्वे च (२.४.१५)

- पदद्वयम् ।
- 'द्विगुरेकवचनम्' ((२.४.१) इत्यतः 'एकवचनम्' इति, 'द्वन्द्वश्च प्राणितूर्यसेनाङ्गानाम्; (२.४.२) इत्यतः 'द्वन्द्वः' इति, 'न दधिपयआदीनि' (२.४.१४) इत्यतः 'न' इति च अनुवर्तते ।
- द्रव्यसङ्ख्यावगमे एकवदेवेति नियमो न स्यात् ।
- दश दन्तोष्ठाः ।

विभाषा समीपे (२.४.१६)

- पदद्वयम् ।
- 'द्विगुरेकवचनम्' ((२.४.१) इत्यतः 'एकवचनम्' इति, 'द्वन्द्वश्च प्राणितूर्यसेनाङ्गानाम्; (२.४.२) इत्यतः 'द्वन्द्वः' इति च अनुवर्तते ।
- अधिकरणैतावत्त्वस्य सामीप्येन परिच्छेदे समाहार एव इत्येवंरूपो नियमो वा स्यात् ।
- उपदशं दन्तोष्ठम् / उपदशा दन्तोष्ठाः ।

आनङृतो द्वन्द्वे (६.३.२५)

- पदत्रयम् । आनङ्, ऋतः, द्वन्द्वे ।
- 'अलुगुत्तरपदे' (६.३.१) इत्यतः 'उत्तरपदे' इत्यधिक्रियते । 'ऋतो विद्यायोनिसम्बन्धेभ्यः' (६.३.२३) इत्यतः 'विद्यायोनिसम्बन्धेभ्यः' इत्यनुवर्तते ।
- विद्या-योनिसम्बन्धवाचिनाम् ऋदन्तानां द्वन्द्वे आनङ् स्याद् उत्तरपदे परे ।
- होतापोतारौ ।
- होता च पोता च ।
- विद्याद्वारक-एकयज्ञ-ऋत्विक्त्वकृतः सम्बन्धः ।

- होतृ औ पोतृ सु ('चार्थे द्वन्द्वः' – २.२.२९)
- होतृ पोतृ ('सुपो धातुप्रातिपदिकयोः' – २.४.७१)
- होतान् पोतृ ('आनङृतो द्वन्द्वे' – ६.३.२५)
- होतापोतृ ('नलोपः प्रातिपदिकान्तस्य' – ८.२.७)
- होतापोतृ औ ('स्वौजस्..' – ४.१.२)
- होतापोतर् औ ('ऋतो ङिसर्वनामस्थानयोः' – ७.३.११०)
- होतापोतारौ ('अक्तृन्तृच्स्वसृनप्तृनेष्टृत्वष्टृक्षत्तृहोतृपोतृ-प्रशास्तॄणाम्।' – ६.४.११)

- होतृपोतृनेष्टोद्गातारः ।
- उत्तरपदे परे आनङः विधानात् बहूनां द्वन्द्वे उपान्त्यस्यैव आनङ् ।

- मातापितरौ ।
- योनिसम्बन्धः ।

- 'पुत्रेऽन्यतरस्याम्' (६.३.२२) इत्यतो मण्डूकप्लुत्या 'पुत्रे' इत्यनुवृत्तेः पितापुत्रौ ।

देवताद्वन्द्वे च (६.३.२६)

- पदद्वयम् ।
- 'अलुगुत्तरपदे' (६.३.१) इत्यतः 'उत्तरपदे' इत्यधिक्रियते । 'आनङृतो द्वन्द्वे' (६.३.२५) इत्यतः 'आनङ्' इत्यनुवर्तते ।
- इहोत्तरपदे परे आनङ् ।
- मित्रावरुणौ ।

वायुशब्दप्रयोगे प्रतिषेधः (वा)

- अग्निवायू/वाय्वग्नी ।

- पुनर्द्वन्द्वग्रहणं प्रसिद्धसाहचर्यस्य परिग्रहार्थम् ।
- तेन 'ब्रह्मप्रजापती' इत्यादौ नानङ् ।
- एतद्धि नैकहविर्भागित्वेन श्रुतम्, नापि लोके प्रसिद्धं साहचर्यम् ।

ईदग्नेः सोमवरुणयोः (६.३.२७)

- पदत्रयम् । ईत्, अग्नेः, सोम-वरुणयोः ।
- 'अलुगुत्तरपदे' (६.३.१) इत्यतः 'उत्तरपदे' इत्यधिक्रियते ।
- देवताद्वन्द्वे इत्येव ।
- सोमशब्दे वरुणशब्दे च उत्तरपदे परे अग्नेः ईदादेशः स्यात् देवताद्वन्द्वे इत्यर्थः ।
- अग्निश्च सोमश्च – अग्नीसोम ।

अग्नेः स्तुत्स्तोमसोमाः (८.३.८२)

- पदद्वयम् । अग्नेः, स्तुत्-स्तोम-सोमाः ।
- 'अपदान्तस्य मूर्धन्यः' (८.३.५५) इत्यधिक्रियते । 'समासेऽङ्गुलेः सङ्गः' (८.३.८०) इत्यतः 'समासे' इत्यनुवर्तते ।
- अग्नेः परेषाम् एषां सस्य षः स्यात् समासे ।
- अग्निष्टुत् । अग्निष्टोमः ।
- अग्नीषोमौ ।
- अग्नीवरुणौ ।

इद्वृद्धौ (६.३.२८)

- पदद्वयम् । इत्, वृद्धौ ।
- 'अलुगुत्तरपदे' (६.३.१) इत्यतः 'उत्तरपदे' इत्यधिक्रियते । 'देवताद्वन्द्वे च' (६.३.२६) इति, 'ईदग्नेः सोमवरुणयोः' (६.३.२७) इत्यतः 'अग्नेः' इति च अनुवर्तते ।
- वृद्धिमति उत्तरपदे अग्नेः इदादेशः स्याद् देवताद्वन्द्वे ।
- अग्नामरुतौ देवते यस्य आग्निमारुतं कर्म ।
- अग्नीवरुणौ देवते अस्य आग्निवारुणम् ।
- 'देवताद्वन्द्वे च' (७.३.२१) इत्युभयपदवृद्धिः ।
- अलौकिके विग्रहवाक्ये आनङ्म् ईत्वं च बाधित्वा इत् ।

- वृद्धौ किम्?
- आग्नेन्द्रः ।
- 'नेन्द्रस्य परस्य' (७.३.२२) इति उत्तरपदवृद्धिप्रतिषेधः ।

विष्णौ न (वा)

- आग्नावैष्णवम् ।

दिवो द्यावा (६.३.२९)

- पदद्वयम् । दिवः, द्यावा ।
- 'अलुगुत्तरपदे' (६.३.१) इत्यतः 'उत्तरपदे' इत्यधिक्रियते । 'देवताद्वन्द्वे च' (६.३.२६) इति च अनुवर्तते ।
- देवताद्वन्द्वे उत्तरपदे ।
- द्यावाभूमी ।
- द्यावाक्षामा ।

दिवसश्च पृथिव्याम् (६.३.३०)

- पदत्रयम् । दिवसः, च, पृथिव्याम् ।
- 'अलुगुत्तरपदे' (६.३.१) इत्यतः 'उत्तरपदे' इत्यधिक्रियते । 'देवताद्वन्द्वे च' (६.३.२६) इति, 'दिवो द्यावा' इत्यतः 'दिवः' इति च अनुवर्तते ।
- दिव इत्येव, चाद् द्यावा ।
- आदेशेऽकारोच्चारणं सकारस्य रुत्वं मा भूदित्येतदर्थम् ।
- द्यौश्च पृथिवी च दिवस्पृथिव्यौ / द्यावापृथिव्यौ ।

- ‘छन्दसि दृष्टानुविधिः’ ।
- ‘द्यावा चिदस्मै पृथिवी’ ।
- ‘दिवस्पृथिव्योररतिः’ इत्यत्र पदकारा विसर्गं पठन्ति ।
- तदसाधुरिति भावः ।

उषासोषसः (६.३.३१)

- पदद्वयम् । उषासा, उषसः ।
- 'अलुगुत्तरपदे' (६.३.१) इत्यतः 'उत्तरपदे' इत्यधिक्रियते । 'देवताद्वन्द्वे च' (६.३.२६) इति च अनुवर्तते ।
- उषस्-शब्दस्य उषासादेशो देवताद्वन्द्वे ।
- उषासासूर्यम् ।
- उषाश्च सूर्यश्च तयोः समाहारः ।

मातरपितरावुदीचाम् (६.३.३२)

- पदद्वयम् । मातर-पितरौ, उदीचाम् ।
- उदीचां मते मातरपितराविति भवतीत्यर्थः ।
- मातरपितरौ ।
- मातृशब्दस्य अरङादेशो निपात्यते ।
- उदीचां किम्?
- मातापितरौ ।
- अरङभावे 'आनङृतो द्वन्द्वे' (६.३.२५) इत्यानङ् ।

द्वन्द्वाच्चुदषहान्तात्समाहारे (५.४.१०६)

- पदत्रयम् । द्वन्द्वात्, चु-द-ष-हान्तात्, समाहारे ।
- 'समासान्ताः' (५.४.६८) इत्यधिक्रियते । 'राजाहस्सखिभ्यष्टच्' (५.४.९१) इत्यतः 'टच्' इत्यनुवर्तते ।
- चवर्गान्ताद् द-ष-हान्ताच्च द्वन्द्वात् टच् स्यात् समाहारे ।
- वाक् च त्वक् च वाक्त्वचम् ।
- त्वक्स्रजम् ।
- शमीदृषदम् ।
- वाक्त्विषम् ।

- छत्रोपनहम् ।

- समाहारे किम्?
- प्रावृड्शरदौ ।

अथ एकशेषप्रकरणम्

सरूपाणामेकशेष एकविभक्तौ (१.२.६४)

- पदत्रयम् । सरूपाणाम्, एकशेषः, एकविभक्तौ ।
- एकविभक्तौ यानि सरूपाण्येव दृष्टानि तेषामेक एव शिष्यते ।
- रामौ रामाः ।